# Rishibhih Kritam 2 Vishnu Stotram

# ઋષિભિઃ કૃતં ૨ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Rishibhih Kritam 2 Vishnu Stotram

File name : RRiShibhiHkRRitaM2viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 84/8-18||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# ઋષિભિઃ કૃતં ૨ વિષ્ણુસ્તોત્રમ્

ઋષય ઊચુઃ ।
નમઃ પરમકલ્યાણ કલ્યાણાયાત્મયોગિને ।
જનાર્દ્નાય દેવાય શ્રીધરાય ચ વેધસે ॥ ૮॥

નમઃ કમલકિઞ્જલ્કસુવર્ણમુકુટાય ચ ।
કેશવાયાતિસૂક્ષ્માય બૃહન્મૂર્તે નમો નમઃ ॥ ૯॥

મહાત્મને વરેણ્યાય નમઃ પઙ્કજનાભયે ।
નમોઽસ્તુ માયાહરયે હરયે હરિવેધસે ॥ ૧.૮૪.૧૦॥

હિરણ્યગર્ભગર્ભાય જગતઃ કારણાત્મને ।
અચ્યુતાય નમો નિત્યમનન્તાય નમો નમઃ ॥ ૧૧॥

નમો માયાપટચ્છન્ન જગદ્ધાત્રે મહાત્મને ।
સંસારસાગરોત્તાર જ્ઞાનપોતપ્રદાયિને ।
અકુણ્ઠમતયે ધાત્રે સર્ગસ્થિત્યન્ત કર્મણે ॥ ૧૨॥

યથા હિ વાસુદેવેતિ પ્રોક્તે નશ્યતિ પાતકમ્ ।
તથા વિલયમભ્યેતુ દૈત્યોઽયં મેઘવાહનઃ ॥ ૧૩॥

યથા વિષ્ણુઃ સ્વભક્તેષુ પાપમાપ્નોતિ સંસ્થિતમ્ ।
તથા વિનાશમાયાતુ દૈત્યોઽયં પાપકર્મકૃત્ ॥ ૧૪॥

સ્મૃતમાત્રો યથા વિષ્ણુઃ સર્વં પાપં વ્યપોહતિ ।
તથા પ્રણાશમભ્યેતુ દૈત્યોઽયં મેઘવાહનઃ ॥ ૧૫॥

ભવન્તુ ભદ્રાણિ સમસ્તદોષાઃ પ્રયાન્તુ નાશં જગતોઽખિલસ્ય ।
અભેદ્યભક્ત્યા પરમેશ્વરેશે સ્મૃતે જગદ્ધાતરિ વાસુદેવે ॥ ૧૬॥

યે ભૂતલે યે દિવિ યેઽન્તરિક્ષે રસાતલે પ્રાણિગણાશ્ચ કેચિત્ ।
ભવન્તુ તે સિદ્ધિયુતા નરોત્તમાઃ સ્મૃતે જગદ્ધાતરિ વાસુદેવે ॥ ૧૭॥

યે પ્રાણિનઃ કુત્રચિદત્ર સન્તિ બ્રહ્માણ્ડમધ્યે પરતશ્ચ કેચિત્ ।
તેષાં તુ સિદ્ધિઃ પરમાસ્ત્વનિન્દ્યા સ્તુતે જગદ્ધાતરિ વાસુદેવે ॥ ૧૮॥

ઇતિ શ્રીસ્કન્દપુરાણે પ્રભાસખણ્ડે પ્રભાસક્ષેત્રમાહાત્મ્યે
ચતુરશીતિતમાધ્યાયાન્તર્ગતં ઋષિભિઃ કૃતં વિષ્ણુસ્તોત્રં
સમાપ્તમ્ ।

સ્કન્દપુરાણ । પ્રભાસખણ્ડ । અધ્યાય ૮૪/૮-૧૮॥

skandapurANa . prabhAsakhaNDa . adhyAya 84/8-18..

Proofread by PSA Easwaran

---

*Rishibhih Kritam 2 Vishnu Stotram*
pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*